No. १०५६ - घ

Title ब्रह्माण्डपुराणे अध्यात्मरामायणटीका

Author गंगाराममिश्रः

Extent 23 Age १८६८

Subject रामगीता . सम्पूर्णम्

नं० १०५८-घ

,अध्यात्मरामायणे (उत्तरकाण्डे)

रामगीता सतत्त्वाख्यटीकासहिता

पत्राणि २३ (सम्पूर्णम्)

नं० १०५७-घ पत्राणि २३

लिपिकः; गंगाराममिश्रः

लि० संवत १८६८-घ

ॐ श्रीगणेशाय नमः ॥ ॐ श्रीरामचंद्राय नमः ॥ अथ भगवान् शिवो रामलक्ष्मणसंवादमुखे
न परं तत्त्वमुपदेष्टुमारभते ॥ ततइति जगतां यानि मंगलानि ग्रामनेदालेषमुपजीव्य भूतं मंगलं
ब्रह्मानंदः सैवात्मा स्वरूपं यस्य तेन एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति
श्रुतेः ॥ मंगलानां च मंगलमिति स्मृतेश्च किं च जगतां मंगलकरणं यस्मात् तनारदशोक
ल्याणरूप आत्मा मर्तिलंपानुत्तमां श्रीब्रह्मादीनां मोहप्रदत्वेतत्तुन्नमां रामायणे कीर्त्तिवा
ल्मीकादिकृतनानाविधरामायणप्रवर्त्तिकां रावणवधादिजां कीर्त्तिं विधाय स्थितो रघूत्त

ततो जगन्मंगलमंगलात्मना विधाय रामायणकीर्त्तिमुत्तमां ॥ चचार पूर्वाचरि
तं रघूत्तमो राजर्षिवर्यैरभिसेवितं यथा ॥१॥ सौमित्रिणा पृष्ट उदारबुद्धिना रामः क
थाः प्राह पुरातनीः शुभाः राज्ञः प्रमत्तस्य नृगस्य शापतो द्विजस्य तिर्यक्त्वमथाह राघवः ॥२॥

मस्ततः सीतापरित्यागानंतरं पूर्वैः स्ववंशजैराचरितं प्रजापालनसत्कथाश्रवणादिकं नरैव
लंतत्सर्वं जनैरेवाचरितमिति किं तन्मैरपि राजर्षिश्रेष्ठैर्यथाभिसेवितं तथा च चार कृतवान् ॥१॥
उदारागुरुवेदविश्वासलक्षणमलाशुणवती यद्वानुदाराशानशीलाबुद्धिर्यस्य तेन पुरातनीः
प्राचीनराजसंबंधिनीः शुभः धर्माधर्मनिर्णायकः प्रमत्तस्य स्वर्गोमंगलमिश्रितब्राह्मणगोदा
नात्प्रमत्तस्य नगस्य राज्ञो द्विजस्य शापात्तिर्यक्त्वमाहेति श्रुत्वान कृतब्रह्मस्वापहारेण परमथा

ॐ
राम.
गी. टी.
२

एकांते विजने ते उपस्थितं प्रणम्य विनयान्वितः सन् भक्त्या गुरुं रघूत्तममिति त्रिधा प्रणम्य प्र
नेन गुरूपसदनप्रकार उक्तः ॥ प्रसादितं शुद्धभावनाता करणं येन सः शुद्धांतःकरण इति
यावत् भगवदुक्तसत्कथाश्रवणेन शुद्धांतःकरण इत्यर्थः ॥१॥ हे महामते महती सर्वविषया
मतिर्यस्य तस्य संबोधनं त्वं शुद्धबोधोसि अनवच्छिन्नचैतन्यस्वरूपोसि सर्वदेहिनामात्मासि जी
वानां तव प्रतिबिंबत्वात् अधीशोसि अंतर्यामित्वात् निर्लेपोसि स्वभेदाभावाच्च सर्वात्मत्वं अ
याधिकभेदाच्च निर्लेपत्वं निजस्वभावो बोधः निराकृतिः ॥ अस्मदादिवत् स्वार्जितकर्माधीनशा

कदाचिदेकांते उपस्थितं प्रभुं रामं रमालालितपादपंकजं सौमित्रिरासादितशुद्धभा
वनः प्रणम्य भक्त्या विनयान्वितोऽब्रवीत् ॥१॥ त्वं शुद्धबोधोसि हि सर्वदेहिनामात्मास्य
धीशोसि निराकृतिः स्वयं प्रतीयसे ज्ञानदृशा महामते पदाब्जभृंगाहितसंगसंगिनां ॥२॥

रीराकृतिरहितः ॥ नन्वेवं सर्वैः कथमेवं न ज्ञायते अत आह ॥ ज्ञानदृशा त्वं स्वयमेव प्रतीयसे
ज्ञायते नेनेति ज्ञानं वेदांतवाक्यजातं तदेव दृक् दर्शनसाधनं येषां तेषामिति संबंधसा
मानेषष्ठी ॥ तैरित्यर्थः ॥ तादृशदृग्लाभश्च तद्भक्त्यधीन इत्याह ॥ पदेति ॥ त्वच्चरणकमल
योर्भृंगवदाहितः कृतसंगो येन तादृशांतःकरणसंगवतां त्वच्चरणकमलसंलग्नांतःकर
॥ णवतामित्यर्थः ॥

ॐ
राम
गी॰टी
२

अथ प्रार्थयते अहमिति भवस्य संसारस्यापवर्गो निवृत्तिर्यस्मात्तादृशं तव पदांबुजं प्रपन्नो
ऽस्मि शरणं प्राप्तोऽस्मि योगिभावितं योगिभिः संसारमुक्तये भावितं ॥ अनेन तस्य भवापवर्गत्वे
सदाचारः प्रमाणमुक्तं प्रार्थनीयमाह ॥ अपारवारिधिरूपमज्ञानं संसारमलकारणं य
था सुखमक्लेशेन तरिष्यामि तथा — — नुशाधि शिक्षय अपारवारिधिमित्यनेन सपार
प्रसिद्धसमुद्राद्व्यतिरेक उक्तः अप्राकृततरणतानेन ध्वनिता ॥५॥ अथोत्तरमवतारयति श्रु
त्वेति रामः सौमित्रिवचः श्रुत्वाथपदे वाक्यालंकारे तदा श्रवणमवतितकाले राघव

अहं प्रपन्नोऽस्मि पदांबुजं प्रभो भवापवर्गं तव योगिभावितं ॥ यथांजसाज्ञानमपा
रवारिधिं सुखं तरिष्यामि तथानुशाधि मां ॥५॥ श्रुत्वाथ सौमित्रिवचोऽखिलं तदा
प्राह प्रपन्नार्तिहरः प्रसन्नधीः विज्ञानमज्ञानतमोपशान्तये श्रुतिप्रपन्नं क्षिति
॥पालभूषणः॥ ६॥

ज्ञानं भक्तानामार्त्तिं संसारदुःखं हरतीति तादृशः प्रसन्ना भ्रमादिहीना भक्तानुग्रहपरा च धी
र्यस्य सः क्षितिपालानां राज्ञां भूषणं भूतोऽज्ञानरूपतमस उपशान्तये एतदर्थं संधिरा
र्षः श्रुतिभिः तमेव विदित्वातिमृत्युमेति नान्यः पंथा विद्यतेऽयनायेत्यादिश्रुतिभिः प्रपन्नं
तत्फलकत्वेन बोधितं विज्ञानमात्मतत्त्वता ॥ मिति सामान्यतः प्रथमं प्राह ॥६॥

अथ तादृशज्ञानप्राप्तये क्रमेण बहिरंगांतरंगसाधनान्याह आदाविति ॥ स्ववर्णाश्रमेषु शा-
स्त्रेण वर्णिताः याः क्रिया नित्यनैमित्तिकप्रायश्चित्तादिरूपास्ताः कृत्वा समासादितशुद्धमानसः
प्राप्तांतःकरणशुचि तत्पूर्वमुपात्तसाधनः तदनुष्ठानपूर्वकमेवानुयायानि संपादितानि
साधनानि शमदमादीनि येन तादृशः अनेन कर्मणां बहिरंगत्वं शमादीनामंतरंगत्वं स्फु-
टमेवोक्तं किंच शमदमवैराग्यदार्ढ्यपर्यंतं कर्मानुष्ठानमेवेति सूचितं । ततस्तत्कर्मानु-

आदौ स्ववर्णाश्रमवर्णिताः क्रियाः कृत्वा समासादितशुद्धमानसः
समाप्य तत्पूर्वमुपात्तसाधनः समाश्रयेत्सद्गुरुमात्मलब्धये ॥ ७ ॥

ष्ठानं समाप्य तत्संन्यासं कृत्वेति यावत् ॥ आत्मलब्धये ॥ आत्मज्ञानाय तत्फलकाय तत्व-
मस्यादिवाक्यार्थविचाराय ॥ सद्गुरुं श्रोत्रियं ब्रह्मनिष्ठमित्यादिलक्षणलक्षितं ॥ समाश्र-
येत् ॥ सेवेत ॥ अनेन श्रुतसन्निवलेन स्वयमेव वाक्यार्थविचारः क्रियमाणो न फला-
येति सूचितं ॥ ७ ॥

ओं
नम
गी.टी
३

3

संसारस्य भ्रमिमच्चक्ररूपत्वात्तन्निवृत्तेश्च तत्कारणज्ञाननिवृत्तिमूलकत्वात्॥ अज्ञाननिवृ
त्तेश्च तत्त्वज्ञानैकसाध्यत्वात्॥ तत्त्वज्ञानस्य च वेदान्तविचारसाध्यत्वात्तदर्थं गुरुसमाश्रयस्याभि
मानः॥ क्रियेत॥ भवः संसारश्चक्रवद्विपरिवर्तमान ईर्यते कथ्यते तदेवोपपादयति॥ आरत्वा
दरपूर्वं पूर्वजन्मार्जिता क्रिया एतस्य शरीरोद्भवस्य जन्मनो हेतुः तत्र जन्मनि सरागिणो विषया
भिलाषवतः तौ शास्त्रप्रसिद्धौ धर्मेतरौ धर्माधर्मौ प्रियाप्रियौ सुखदुःखजनकौ भवतः कस्य

क्रियाशरीरोद्भवहेतुरादृता प्रियाप्रियौ तौ भवतः सरागिणः॥ धर्मेतरौ
तत्र पुनः शारीरकं पुनः क्रियाश्चक्रवदीर्यते भव॥८॥

चिद्धर्म एव सुखत्वदुःखप्रवृत्तिः कस्यचिद्धर्मेणावकदाचिदितस्य फलं ह्यारावतन्त्रोत्पादितक
र्मणा पुनः शरीरं पुनः क्रियाः इत्येवं चक्रवद्विपरिवृत्तिः यथानन्त्यभ्राम्यमाणेऽधोभागः क
दाचिदूर्ध्वपतितनश्चाधः पुनरूर्ध्वं पुनरधश्चैवं जन्मक्रिययोर्जन्मानन्तकभावेन परिवृत्तिरिति
ति बोध्यम्॥८॥

तस्य चाज्ञानमेव मूलमित्याह अज्ञानमेवेति ॥ अत्र विधौ संसारनिवृत्तिलक्षणे कर्तव्ये यत्तज्ज्ञा
नमेव मूलकारणत्वादज्ञाननाशनमेव विधीयते साधनत्वेनेति शेषः ॥ ननु कर्मैव तन्नाशकमस्तु
किं ज्ञानेनेनेत्याशंक्याह विशेषवत्तन्नाशविधौ मलाज्ञाननाशजनने पटीयसी सम
र्था न कर्म समर्थमिति शेषः ॥ यतस्तत् तज्जं अज्ञानजं आत्मस्वरूपाज्ञानजन्म देहाद्यभिमा

अज्ञानमेवास्य हि मूलकारणं तद्धानमेवात्र विधौ विधीयते ॥ विशेषवत
न्नाशविधौ पटीयसी न कर्म तज्जं सविरोधमीरितं ॥९॥ राम ॥ राम ॥ राम

नजन्यत्वात्कर्मणो ज्ञानजन्यत्वं वोध्यं ॥ ननु तज्जन्यस्यापि तन्नाशकत्वं रश्मिककर्कशादौ
दृष्टमित्याशंक्य तज्जन्यत्वं च न नाशकत्वे प्रयोजकं किं तु सविरोधत्वमेवेत्याह यत्सविरोधं
तदीरितं नाशकमुक्तमित्यर्थः ॥९॥

ॐ
राम
गी.टी.
५

अत एव कर्मणा वाज्ञानहानादीत्याह ॥ नाज्ञानेत्यादि यतः कर्मणा विरोधाभावान्नाज्ञाननाशो
नापि रागनाशस्ततः कर्मानुष्ठानात्पुनः पुनः सदोषं क्षयिफलत्वादिदोषविशिष्टं कर्मैवोद्भवेत्
कर्मणश्च पुनः संसार एवेति न मुक्तं प्रत्यासात तस्माद्बुधो विवेकी ज्ञानविचारवान् ज्ञाय
तेनेनेति ज्ञानं वेदान्तवाक्यं तद्विचारवान्भवेत् ॥१०॥ इदानीं ज्ञानस्यैव मोक्षहेतुत्वं वक्तुं ज्ञानक
र्मसमुच्चयवादिदूषणायानुवदति सार्धेन नन्विति नन्विति शंकायां यथा विद्या वेदमुखेन श्रु
तिस्मृतिपुराणलक्षणेन ब्रह्मविदाप्नोति परमित्यादिना पुरुषार्थसाधनमुक्ता तथानुभाभ्या

नाज्ञानहानिर्न च रागसंक्षयो भवेत्ततः कर्म सदोषमुद्भवेत् ततः पुनः संसृति
रप्यवारिता तस्माद्बुधो ज्ञानविचारवान्भवेत् ॥१०॥ ननु क्रियावेदमुखेन चोदिता य न
थैव विद्या पुरुषार्थसाधनं कर्तव्यता प्राणभृतः प्रचोदिता विद्यासहायत्वमुपैति
॥सा पुनः ११॥

मेव पक्षाभ्यां यथा खे पक्षिणां गतिः ॥ तथैव ज्ञानकर्मभ्यां प्राप्यते ब्रह्म शाश्वतमित्यादिना क्रि
याभिः तत्साधनत्वेनोक्ता किंच क्रिया कर्तव्यता ॥ तृतीयार्थे प्रथमा कर्तव्यतया आवश्यकेक्त
त्वः अवश्यकर्तव्यतया प्रचोदिता नित्यनैमित्तिकरूपा एवं च तद— रणे प्रत्यवायोत्पत्त्या
ज्ञानोत्पत्तिरेव न स्यात् ॥ तस्मात्सा पुनर्विद्यायाः सहायत्वमाप्नोति घटे जननीये प———
॥चक्रादीनां परस्परसहायता ॥११॥ राम

कर्त्तव्यतेति सोऽक्रमेव विवृणोति ॥ क्रमेति ॥ वीरहा वा एष देवानां योऽग्निमुद्वासयते ॥ यावज्जीवमग्निहो
त्रं जुहोतीति श्रुतिः तत्र सिद्धांती शंकते. नन्विति ॥ ध्रुवस्थिरस्य कार्यपर्यंतपुरुषार्थमोक्षजनिका विद्या
यतः स्वतंत्रा विनापि सहायेन स्वकार्यसंपादने समर्था यथा तेजस्तिमिरनिवर्तने समर्थं मन
सापि किंचित्सहायमंतं वस्तु नापेक्षते तथा फलजननीये सहायो तत्र संभावनापि नेति भावः
अनेन विद्याफलजनने निरपेक्षा स्वतंत्रत्वादग्नोवदित्यनुमानं सूचितं ११ समुच्चयवादी परिहर
तिनेति तदुक्तं नेत्यर्थः स्वस्वकार्यः अहरहं हवै यातयामास्यपाजिनः स कृतं भवतीत्यादिवेदेन बोधि

कर्माकृतौ दोषमपि श्रुतिर्जगौ तस्मात्सदा कार्यमिदं मुमुक्षुणा ॥ ननु स्वतंत्रा ध्रुवकार्यका
रिणी विद्या न किंचिन्मनसाप्यपेक्षते ॥ १४ ॥ मसत्यकार्योपि हि पद्धूरध्वरः प्रकांक्षतेऽन्यानपि
कारकादिकान् तथैव विद्या विधितः प्रकाशितैर्विशिष्यते कर्मभिरेव मुक्तये ॥ १५ ॥ राम

तस्थिरकार्योपि ध्रुवाध्वरः यथान्यानपि कारकादिकान् आरादुपकारकप्रयाजाद्यंगानि देशका
लादीनि च प्रकांक्षते तथा विद्यापि अग्निहोत्रं जुहोतीत्यादिविधिवाक्यतः तत्समरेन प्रकाशि
तैः कर्मभिः सहितैव मुक्तये विशिष्यत इत्यर्थः विद्याफलदाने कर्मापेक्षा अंगित्वात् प्रयाजाद्यं
गापेक्षदर्शादिवदिति सत्प्रतिपक्षानुमानमनेन सूचितं ॥ १२ ॥ राम राम राम

ॐ
राम॰
गी॰टी॰
५

5

तदनूद्य सिद्धांती दूषयति ॥ केचिदिति ॥ यत्केचिद्धि तर्कवादिन इति ॥ ज्ञानकर्मणी समुच्चिते मुक्ति
साधनं वदंति तदप्यसत् यथा केवलं कर्म मोक्षसाधनमित्यसत् तथा तन्मिलितमित्यप्यसत्
तत्र हेतुर्दृष्टिविरोधः सर्वलोकदृष्टविरोधनूपात्कारणान्न इदमसदित्यर्थः ॥ विरोधमेवाह देहाभिमाना
त् क्रियाद्वर्धते आ॰ नात्मनि देहाद्याकात्मत्वाभिमानात्क्रियावृद्धिः ॥ विद्यातद्गताहंकृतितः प्र

केचिद्वदंतीति वि॰ तर्कवादिनस्तदप्यसद्दृष्टविरोधकारणात् ॥ देहाभिमानाद्धि वर्ध
ते क्रिया विद्या गताहंकृतितः प्रसिध्यति ॥ १४ ॥

नाहंकृतिर्यस्य तस्य न ह्यहं करोति अतः सिध्यति सार्वविभक्तिकस्तसिः एवं चाहंकारसत्त्वासत्त्वा
मूलकत्वात् क्रियाज्ञानयोः समुच्चयो विरुद्ध इत्यर्थः ॥ १४ ॥ राम ॥ राम ॥ ॥ राम

अथपूर्वपक्षोक्तानुमानंदूषयन्विद्यास्वरूपमाह॥विशुद्धेति॥विशुद्धंविज्ञानंयेषांतेषांवेदां
तवाक्यानांपदृद्धिशेषत्वस्येचनं॥तयोरभेदालोचनंविचारस्तेनांचिताशपितायाचरमाशात्म
वृत्तिर्ब्रह्माकारांतःकरणवृत्तिः साविद्येतिभण्यते विशुद्धिरितिशेषः पुनः समुच्चयपवारणाय
विद्याकर्मणोर्वैलक्षण्यमाह कर्मयज्ञादि॥अखिलकारकादिभिः कर्तृकर्मादिभिरंगैस्सहितंसदु
देति फलायोन्मुखंभवति॥विद्यापुनरखिलकारकादिकंनिहंतितिन्नकर्तृत्वादिबुद्धिंनिहंति॥स

विशुद्धविज्ञानविरोचनांचिताविद्यात्मवृत्तिश्चरमेतिभण्यते॥उदेतिक
र्माऽखिलकारकादिभिर्निहंतिविद्याखिलकारकादिकं॥१५॥

कलव्यापारपरित्यागेनब्रह्मणिसमाभिर्हिविद्याअतःसानोत्पत्तौविनश्यद्धिद्वाराकर्मसा
पेक्षास्वफलेजनयितव्येतत्रैवरूपैवैवअन्यथाविद्यास्वरूपस्यैवभंगापत्तेरितिपूर्वपक्षोक्तहेतो
रसिद्धिरितिभावः १५॥

ॐ. राम गी. टी. ९

6

नुपसंहरन्मुमुक्षोर्वृत्तिप्रकारमाह ॥ तस्मादिति ॥ विद्याविरोधात् ॥ विद्यायाः कर्मणा सह विरो
धेन समुच्चयो न भवेत्तस्मात् सुधीर्मुमुक्षुरशेषतः कर्म त्यजेत् काम्यं तु कर्म सर्वथा त्याज्यमेव
नित्यनैमित्तिकमपि यावच्चित्तशुद्धि कर्तव्य एव ततोपि ब्रह्मण्येव चित्तस्थैर्यपर्यन्तं कर्तव्यमेव ॥ त
तस्तदनुसंधानप्रतिबंधकत्वात्प्रयोजनाभावाच्च तदपि त्याज्यमेवेति भावः ॥ इदानीं मुमुक्षोः

तस्मात्त्यजेत्कार्यमशेषतः सुधीर्विद्याविरोधान्न समुच्चयो भवेत् ॥ आत्मा
नुसंधानपरायणः सदा निवृत्तसर्वेन्द्रियवृत्तिगोचरः ॥ १८ ॥

वै

कर्तव्यमाह ॥ निवृत्ताः सर्वेषामिन्द्रियाणां गोचरा विषयाः शब्दादयो यस्मात्तादृशः सन् आत्म
नः सच्चिदानन्दस्यानुसंधानमेव परमयनं प्राप्यं यस्य तथाविधो भवेत् ॥ अत्रेन्द्रियप्रत्याहा
रः कर्तव्यत्वेनोक्तस्तेन तत्पूर्वप्राणायामाद्यपि तद्विधं ॥ १८ ॥ राम ॥

रागिविरागिभेदेन कर्मणां कर्त्तव्यताकर्तव्यते आह ॥ यावदिति मायया विद्यया शरीरादिष्वना
त्मसुः आत्मधीरहंकर्तेत्यादिरूपा यावद्वर्त्तते । तावद्विधिवादकर्मणां विधिः । यजेतेत्यादिश्रुति
वीदः कर्त्तव्यताबोधको पेषा कर्मणां विधेयो वशवर्त्ती तत्कर्त्ता भवेत् तदुपगमेनन्तरं खिलं जगत्

यावच्छरीरादिषु माययात्मधीस्तावद्विधेयो विधिवादकर्मणां
नेतीति वाक्यैरखिलं निषिध्य तत् ज्ञात्वा परात्मानमथ त्यजेत् क्रियाः ॥१८॥

नेतीति वाक्यैः अथात आदेशो नेति नेतीत्यादिवाक्यैर्निषिध्य मिथ्यात्वेन निर्णीय तद्विलक्ष
णतपास्तत्वेन परात्मस्वरूपं ज्ञात्वा क्रियास्त्यजेत इति निरूपितमेतत् ॥१८॥ राम

ॐ
राम
गी.टी.
७

7

आत्मज्ञानेनस्वस्वरूपमविद्यानिवर्त्तनंतस्मात्पदेतिआत्मनिष्ठेन्तःकरणेपरात्मनईशस्या
त्मनोजीवस्यचयोविभेदोमायान्तःकरणरूपोपाधिद्वयकृतोविभेदोभेदस्तस्यभेदकंनाशकंभास
रंप्रकाशशीलंयद्विज्ञानं इतरस्मृपमईनपूर्वकंब्रह्माकारत्तमवत्तिर्यदावभाति ॥ असंभा
वनादितिरस्कारेणोदेति तदैवससकारकाजन्मांतरव्यापककर्मसहिता मायातत्कार्योपा

यदापरात्मात्मविभेदभेदकं विज्ञानमात्मन्यवभाति भास्वरं ॥
तदैव मायाप्रविलीयतेंजसा सकारका कारणमात्मसंसृते ॥ १८ ॥

धिभूताविद्यांजसाझरितिविलीयते नश्यति ॥ ननुतन्नाशेपिसंसारनाशः कथमतोमाया
विशेषणं आत्मसंसृतेःकारणंसंसारस्योपादानकारणमेवंचतन्नाशेकार्यनाशोभवत्ये
वेतिभावः ॥ १८ ॥ ॥ राम ॥

उक्तमेवार्थं पुनर्वैशद्यायाह ॥ श्रुतीति ॥ तत्त्वमसीत्यादिश्रुतिरूपैः प्रमाणैस्तज्जनितज्ञानेन
नाशिता -- द्या कथमपि कार्यकारिणी भविष्यति काकुस्वरसवैद्यानेनार्थः अत एव कार्यकारि
त्वासंभवादिति भावः पुनरुत्पत्त्यभावमाह विज्ञानमात्रादिति ॥ असत्त्वाद्द्वितीयतः ॥ असत्त्वा
द्द्वितीयात्मविषयकविज्ञानमात्रादितरासहेतुत्वाच्चिद्विद्यायास्तत्परिपाकजज्ञानाद्यतो

श्रुतिप्रमाणैर्भिन्ना नाशिता या सा कथं भविष्यत्यपि कार्यकारिणी
विज्ञानमात्रादसमत्वाद्द्वितीयतस्तस्मादविद्या न पुनर्भविष्यति ॥ १९ ॥

नशात्तस्मात्सा पुनर्न भविष्यतीति विज्ञानमूलकत्वात्सर्वस्यास्य ज्ञानेनैव निवृत्तस्य
स्यान पुनरुत्पत्तिरिति भावः ॥ १९ ॥ राम

ॐ
राम
गी.टी.
८
48

विद्यापादत्तरनिरपेक्षायाश्च मोक्षकारणत्वमुक्तं युक्तिश्चैवोक्तं पुनः कथयति श्रोतृदार्ढ्य
पयदीति यदि नष्टास्तत्वज्ञाननाशितास्तान् पुनः प्रसूयते नोत्पद्यते तदा कारणाभावादहं
मतिः कथं भवेत् कथमपि न भवेदित्यर्थः तदभावाच्च तत्कालिकर्माभाव इति स्वफलज
नने स्वातंत्र्यात्तत्वनिरपेक्षैव न किमप्यपेक्षते द्वितीयस्यासंभवात् अतः केवलासहाये
व विमोक्षाय विभातीति तत्फलिका भवतीत्यर्थः ॥ २० ॥ अत्रार्थे श्रुतिरपि प्रमाणमित्याह से

यदा स्वनष्टान् पुनः प्रसूयते कर्ताहमस्मीति मतिः कथं भवेत् ॥ तस्मात्स्वतंत्रा न
किमप्यपेक्षते विद्या विमोक्षाय विभाति केवला ॥ २० ॥ सा तैत्तिरीयश्रुतिराह सादरं
न्यासं प्रशस्ताखिलकर्मणां स्फुटं एतावदित्याह च वाजिनां श्रुतिर्ज्ञानं विमोक्षा
य न कर्मसाधनं ॥ २१ ॥ ॥ राम ॥ राम राम

तिसा प्रसिद्धा न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुरित्यादिका तैत्तिरीयश्रुतिः
प्रशस्तानामर्थवादैः प्रशस्येन बोधितानामपि कर्मणां न्यासं त्यागं सादरं स्फुटमाह न तु
कर्मसमुच्चयमित्यर्थः तथा वाजिनां वाजसनेयिनां एतावदरे खल्वमृतत्वमित्यादिका
ज्ञानं विमोक्षाय साधनं न कर्मेत्येतदाह ॥ २१ ॥ राम

अहंकारतन्मात्ररूपकारणवैषम्यात् क्रियाज्ञानयोर्वैषम्यमुक्त्वा फलप्रयुक्तमपि वैषम्यमाह विवि
धेति हे समुच्चयवादिन् त्वया क्रतुरश्मिशोमादिर्विद्यासमत्वेन दर्शितः ॥ परंतु समोऽदृष्टांतो नो
दाहृतः अनेन क्रतोर्विद्यासमः श्रुतिबोधितकर्तव्यताकत्वात् इत्यनुमानं निरस्तं दृष्टांती
भावात् अन्वय्येवानुमानं न व्यतिरेकीति भावः एतच्चाकरे विस्तरेण प्रपंचितं ननु वि
द्याकर्मणी समे एकफलत्वाच्चक्षुरादिवदित्यनुमानमिति चेन्नेत्याह फलैः पृथक्त्वात् ष थे
तीयाफलानां भेदादित्यर्थः एवं चत्वरूपासिद्धो हेतुरिति भावः समानकारकत्वमपि हेतुर्न

विद्यासमत्वेन तु दर्शितस्त्वया क्रतुर्न दृष्टांत उदाहृतः ॥ फलैः पृथ समा
क्त्वाद्बहुकारकैः क्रतुः संसाध्यते ज्ञानमतो विपर्ययं ॥२२॥ राम

स्याह क्रतुर्बहुभिः कारकैः अहंममताभिमानरूपैरंतरैर्बाह्यैश्च देशकालादिनियमैश्च
साध्यते ज्ञानं त्वतो विपर्ययं वदतो न तयोः साम्यमिति भावः ॥२२॥ राम ॥

ॐ
राम.
गी टी
९

नन्वकरणेऽप्रत्यवायभियाकर्मकार्यमितिचेन्नेत्याह सप्रत्यवायइतिकर्मत्यागेहिनिश्चयेना
हंप्रत्यवायसहितोभविष्यामीत्येवंरूपाह्यात्मनि॥अत्रनात्मधर्मस्यधीरज्ञस्यतत्वज्ञानविकल
स्यप्रसिद्धानततत्वदर्शिनःतस्मादहंबुद्धेरभावात्पापादेरनात्मधर्मत्वानिश्चयाच्चतस्माद्बुधैः

सप्रत्यवायोऽहमितिनात्मधीरज्ञप्रसिद्धानतुतत्वदर्शिनः॥तस्मा
द्बुधैस्त्याज्यमविक्रियात्मभिर्विधानतःकर्मविधिप्रकाशितं॥२३॥

कर्मक्रियात्मभिःषसर्वर्तनीयाक्रियाफलासक्तचित्तानांविधानतोविधानेनइतिक
र्तव्यतयाप्रयुक्तंकर्मविधिभिरवश्यकर्तव्यतयाबोधितमपित्याज्यमितिसर्थः॥२३॥

अथ विरक्तस्य कार्यमाह ॥ श्रद्धेति ॥ गुरुशास्त्रयोर्विश्वासः श्रद्धा तदन्वितो बुभुक्षुः शुद्धमा
नसोऽपि निष्कामकर्मानुष्ठानाच्छुद्धमानसः स्वगुरोः प्रसादाल्लब्धतत्त्वमसीति वाक्यतः प्र
त्यगात्मजीवयोरैकात्म्यं विज्ञाय मनननिदिध्यासनपरिपाकाभ्यासात्साक्षात्कृतत्त्व एवार्थः साक्षा
त्कृत्यैवमुक्तीभवेत् सकलदुःखहीनो भवेदिति भावार्थः ॥ अथ प्रकारान्तरेण विषयाभिलाषाच्छोभितान्तः
करणः २४ महावाक्यं विचार्य तु वाक्यार्थस्य पदार्थबोधपूर्वकत्वमाह ॥ आद्याविति ॥ विधान

श्रद्धान्वितस्तत्त्वमसीति वाक्यतो गुरोः प्रसादादपि शुद्धमानसः ॥ विज्ञाय चैका
त्म्यमथात्मजीवयोः सुखीभवेन्मेरुरिवाप्रकम्पनः ॥ २४ ॥ आद्यौ पदार्थावगतिर्हि का
रणं वाक्यार्थविज्ञानविधौ विधानतः । तत्त्वंपदार्थौ परमात्मजीवकावसीति चैका
त्म्यमथानयोर्भवेत् ॥ २५ ॥ राम राम

तः श्रमप्रमादरहितेन वाक्यार्थविज्ञानस्य विधावुत्पत्तौ आद्यौ प्रथमं मुख्यमिति याव
त् ॥ पदार्थावगतिः कारणं हि प्रसिद्धं ॥ तस्य पदद्वयं तत्त्वमसीति तत्र तत्पदार्थः परमात्मा
सर्वज्ञत्वादिगुणः त्वंपदार्थो जीवः ॥ अनयोस्तत्त्वंपदार्थयोरैकात्म्यं तद्बोधकमसीतिपदं २५ ॥

ॐ राम गौरी १०

ननु सर्वज्ञत्वादिगुणस्येशस्य किंचिज्ज्ञत्वधर्मवता जीवेनैकात्म्यं विरुद्धमित्याशङ्क्याह प्रत्य
गिति अहं बुद्धिवेद्यत्वं प्रत्यक्त्वं जीवधर्मः परोक्षत्वमीशधर्मस्तदादिधर्मकृतमात्मनोः पर
मात्मजीवात्मनोर्विरोधं विहाय लक्षणया संशोधिताभ्यां युक्तिभिः सम्यग्विचारिताभ्यां तत्त्वंप
दाभ्यां शक्यभावेऽपि वक्ष्यमाणप्रकारया लक्षणया लक्षिता ज्ञाता चिदात्मता संगच्छते तत्त्वंपद
योः पदस्थितिविषयीकृत्वा स्वमात्मानं तथा ज्ञात्वा पूर्ण ऐकात्म्यज्ञानेन तरं शुद्धद्वयो भवेत् चित्स्वरूप

प्रत्यक्परोक्षतादिविरोधमात्मनोर्विहाय संगृह्य तयोश्चिदात्मतां ॥ संशोधितां
लक्षणया च लक्षितां ज्ञात्वा स्वमात्मानमथाद्वयो भवेत् ॥ ३२ ॥ राम ॥

तां यावत्स एव भवेत् सर्वमपि तत्स्वरूप एव विस्मृतकंठगामीकरन्यायेन च तत्प्राप्तिरत इवेति
उक्तं अद्वयं भावः ॥ तत्त्वंपदयोर्हि वाच्यार्थौ वाच्यो लक्ष्यश्च ॥ तत्र तत्पदस्य मायोपाधिः सर्वज्ञत्वादिवि
शिष्टो वाच्यः त्वंपदस्यापि किंचिज्ज्ञत्वादिविशिष्टो मायाकार्याविद्योपाधिरविद्यावदन्तः
करणोपाधिर्वाच्यः ॥ उभयोरपि विशेषणांशत्यागेन शुद्धश्चिदात्मा लक्ष्यः तत्र वाक्ययो
र्विरुद्धधर्मकत्वादैक्यासंभवेऽपि लक्ष्ययोरैक्यं निर्बाधमेव इति ॥ ३३ ॥ राम ॥

उक्तलक्षणस्वरूपमाह एकात्मकत्वादिति जहतीलक्षणा जहत्स्वार्थलक्षणा यथा गंगायां घो
ष इत्यत्र गंगापदार्थस्य प्रवाहस्य घोषाधारत्वानुपपत्त्या सर्वथा तत्परित्यागेन तीररूपार्थलक्षणा
साप्यत्र तेन एकात्मकत्वात् विशेष्यांशस्यैकत्वात् सर्वथा स्वार्थत्यागाभावात् तथा जहल्लक्षणता न
हत्स्वार्थलक्षणावत्त्वमपि अत्र न संभवति यथा काकेभ्यो दधि रक्ष्यतामित्यादौ काकपदस्य स्वार्था
त्यागेनैव दध्युपघातके लक्षणस्याविन विरोधतः विशेषणत्यागेन सर्वथा स्वार्थत्यागाभा
वात् ॥ अतो भागलक्षणा जहदजहल्लक्षणा युक्तेत्यदोषतः पूर्वोक्तदोषाभावात् विशेष्यांशस्य

एकात्मकत्वाज्जहती न संभवेन्न चाजहल्लक्षणता विरोधतः ॥ सोयंपरा
र्थाविव भागलक्षणा युज्येत तत्त्वंपदयोरदोषतः ॥ २७ ॥ राम ॥

त्यागाद्विशेषणांशस्य त्यागाच्च तत्र दृष्टांतः सोयंपदार्थाविव यथा सोयंदेवदत्त इत्यत्र तद्देशादि
विशिष्टातीतानुभवविषयो वा तत्पदार्थः ॥ एतद्देशादिविशिष्टोऽनुभूयमानो वेदंशब्दार्थस्तयो
श्च विरुद्धविशेषणकत्वादैक्यासंभवे तद्देशादिरूपविशेषणत्यागेनानुभवेतीतत्वादिविशे
षणत्यागेन वा लक्षणयैक्यं तद्वदिति भावः ॥ २७ ॥ राम ॥

ॐ
राम·
गी·टी
११

अथत्वाम्पत्वापजीवोपाधिमाह रसादीति रसादीति रसा पृथ्वी आदिर्येषां तानि पंचीकृतानी
पानि भूतानि तेभ्यः संभवो यस्य तत् पंचीकरणं चैत्थं ॥ एकैकं भूतं द्विधा विभज्य तत्रैकं भागं चतु
र्धा विभज्य तेषां भागानां स्वेतरभूतचतुष्टयार्धभागचतुष्टये संयोजने एकैकं भूतं पंचात्मकं
भवति भागाधिक्याच्च प्रातिस्विकतया भूतादिव्यवहारो येपि सुखदुःखयोरादीनि कारणानियानि

रसादिपंचीकृतभूतसंभवं भोगालयं दुःखसुखादिकर्मणां ॥ शरीरमाद्यं
तवदादिकर्मजं मायामयं स्थूलमुपाधिमात्मनः ॥२२॥ राम ॥

कर्माणि तेषां यो भोगस्तत्कर्मजं सुखदुःखानुभवस्तस्यालयमाश्रयभूतमाद्यंतवत उत्प
त्तिनाशयोगि आदिकर्मजं प्राग्भवीयकर्मजनं मायामयं परंपरया मायाविकारः तद्वि
कारभूतविकारत्वात् एतच्छरीरमात्मनः स्थूलमुपाधिं विद्धीति शेषः ॥२२॥ राम

अथ सूक्ष्मोपाधिमाह ॥ सूक्ष्ममिति बुधा आत्मनः स्थूलशरीरविलक्षणं शरीरं लिंगदेहाख्यं आ-
त्मन उपाधिं विदुः तत्स्वरूपमाह ॥ सूक्ष्मं चक्षुराद्यविषयः मनोबुद्धिदशेंद्रियैः प्राणैश्च युतं संक-
ल्पात्मकं मनः निश्चयात्मिका बुद्धिः घ्राणरसनचक्षुस्त्वक्श्रोत्रेति पंच ज्ञानेंद्रियाणि वाक्
पाणिपादपायूपस्थानि कर्मेंद्रियाणि प्राणापानव्यानोदानसमानाश्च प्राणास्तैर्युतं ॥ ए-

सूक्ष्मं मनोबुद्धिदशेंद्रियैर्युतं प्राणैरपंचीकृतभूतसंभवं ॥ भोक्तुः सु-
खादेरनुसाधनं भवेच्छरीरमन्यद्विदुरात्मनो बुधाः ॥१२॥ राम ॥

तत्सप्तदशसमुदायात्मकं तदाधारभूतस्थानं चाहापंचीकृतभूतसंभवं तेभ्य उत्पन्नं अत-
एवादृश्यं तथा भोक्तुः सुखादेः सुखदुःखाद्यनुभवस्यानुसाधनं स्थूलशरीरस्यैतदनुगत-
स्यैव भोगसाधनत्वमिति भावः ॥ एतद्वियोगेनैव मरणव्यवहार इति बोध्यं ॥१२॥ राम

ॐ
राम.
गीता.
१२

इति जीवोपाधिद्वयमुक्त्वा ईशोपाधिमाह अनादीति ॥ अनादिं तु मत्रिहीनं नानाविधपरिणा
मशालितपरिणामरूपेण न मुष्यमिति अनादित्वमात्रो न्मामस्यचितं ॥ अनिर्वाच्यं सत्त्वासत्त्वा
भ्यां निर्वक्तुमशक्यं कारणं सकलप्रपंचस्य जनकं ईदृशी माया तत्प्रधानः परं देहस्य स्थूलस्य महा
रसंपादकत्वात् उत्कृष्टं प्रधानं शरीरकं स्वार्थिकः एवमुपाधिभेदादेकमेव चैतन्यं यतः पृथक्

अनाद्यनिर्वाच्यमपीह कारणं मायाप्रधानं तु परं शरीरकं ॥ उपाधि
भेदात्तु यतः पृथक् स्थितं स्वात्मानमात्मन्यवधारयेत् क्रमात् ॥ २० ॥

स्थितं जीव ईश्वर इति भेदबुद्धिविषयमतो लक्षणयोपाधिपरित्यागेन स्वात्मानं ॥ आत्म
न्यवधारयेत् ॥ अभेदेन जानीयात् ॥ क्रमात् श्रवणमनननिदिध्यासनक्रमेणेत्यर्थः
२०

अथवाक्यार्थविचारफलमाह कोशेष्विति आनंदमयस्य ब्रह्मत्वे अन्नमयप्राणमयमनो
मयविज्ञानमयेषु चतुर्षु कोशेषु ततसंगात्तत्तदाकृतिर्विभाति यथा नयादिसंगात्स्फटिको
नेकाकृतिर्भाति आनंदमयस्यापि ॥ जीवत्ववादिनां तु ते न सह पंचसु कोशेष्विति वा अथ अ
स्मिन्मते वाक्ये परितो विचारिते सत्स्वयमात्मा संगरूपः ॥ अन्नमयादिभिः संगरहितः

कोशेषु पंचस्वपि तत्तदाकृतिर्विभाति संगात्स्फटिकोमलो यथा
असंगरूपोयमजो यतोद्वयो विज्ञायतेस्मिन्परितो विचारिते ॥ २८ ॥

असंगो न हि सज्जत इति श्रुतेः ॥ अतोद्वयश्च विज्ञायते स्थूलोहमित्यादित्वाहस्य तत्त
कोशासंगात्प्रतीतिः स्फटिकवत्तत्त्वहस्य तु न तथा प्रतीतिरिति भावः एवं च तत्तदुपा
धिकृततत्तद्रूपताप्रतीतिनिरासएव विचारफलमिति भावः ॥ २८ ॥ राम ॥

ॐ
राम
गी. टी.
१३

13

जाग्रदाद्यवस्थास्वपि बुद्धिधर्मो नात्मधर्म इत्याह बुद्धेरिति ॥ इहात्मनि सत्त्वादिभेदेन जाग्र
त्स्वप्नसुषुप्तिभेदेन या त्रिविधा वृत्तिर्दृश्यते सापि गुणत्रयात्मनः सत्त्वरजस्तमोरूपगुणत्रयस्व
रूपाया बुद्धेर्धर्मः उक्तावस्थात्रयसाक्षित्वेनामूर्तत्वात् एतदवस्थात्रयस्यास्मिन्नवस्था
त्रयसाक्षिणि आत्मनि भानेऽपि बुध्यध्यासेनैव न तु वास्तवमित्यर्थः ॥ अन्योन्यतो व्य
भिचारतस्तस्यावस्थात्रयस्य स्वरूपतो मृषात्वात् तज्ज्ञानस्य मृषात्वमेव स्वप्नकाले जाग्रत्सु

बुद्धेस्त्रिधा वृत्तिरपीह दृश्यते स्वप्नादिभेदेन गुणत्रयात्मनः ॥ अन्योन्य
तोऽस्मिन् व्यभिचारतो मृषा नित्ये परे ब्रह्मणि केवले शिवे ॥ २२ ॥

षुप्त्योरभावात् जाग्रति तदुभयस्याभावात् सुषुप्तावितरयोरभावात् परस्परं व्यभिचारो बोध्यः
आत्मनस्तदनाश्रयत्वं विशेषणैराह नित्ये इत्यादिना सर्वदा एकरूपे परे गुणत्रयातीते ॥ ब्रह्मणि
व्यापके केवले असंगे शिवे आनन्दरूपे एवंभूते तस्मिन्नेकरसे परस्परव्यभिचारिधर्माणाम
॥ संभवोऽस्तीति भावः ॥ २२ ॥

प्रथमाभ्यासप्रसंस्कारमूलभूतां प्रवृत्तिमाह । देहेति एषां संघातं देहेन्द्रियाध्यासविषयात् प्रव
र्तमाना वृत्तिर्योऽवुद्धेर्वृत्तिस्तमोमूलतया तल्लक्षणमज्ञत्वज्ञापिकाया वस्तुविवर्ततो ना वद्भवः संसा
रोद्भवो भवेत् तमःपरं रजसोऽप्युपलक्षणं तत्र तमःप्रधाना बुद्धिः संसारहेतुत्वात् सर्वथा त्या
ज्येति भावः ॥२७॥ कृतमहावाक्यविचारस्य कर्त्तव्यमाह नेतीति अथात आदेशो नेति नेतीति
प्रमाणेन निराकृतमखिलं प्रपञ्चत्वेन गृहीतमखिलं जगद्येन सः ततो हृदा सत्वप्रधानेन मनसा
समास्वादितं चिद्घनं एव नाम तद्रूपः स्वात्मसमिच्छमृतं येन सः स्वर्गादि तु परिणामदुःखता

देहेन्द्रियप्राणमनश्चिदात्मनां संघादजस्रं परिवर्तते धियः ॥ वृत्तिस्तमोमूलतयाऽवि
लक्षणा यावद्भवेत्तावदसौ भवोद्भवः ॥२७॥ नेति प्रमाणेन निराकृताखिलो हृदा समा
स्वादितचिद्घनामृतः । त्यजेदशेषं जगदात्तसद्रसं पीत्वा यथाम्भः प्रजहाति तत्फलं ॥२८॥

त्सं भिन्नमेव एवं भूतो ऽशेषं जगत् देहेन्द्रियादिरूपसमूहं त्यजेत् तदा नोपादानबुद्धिविषयं न कु
र्यात् किं तदासीनस्तत्र भवेत् ननु देहेन्द्रियादिभिरेव तत्त्वज्ञानलाभात् कथमुपजीव्यस्य तस्य त्याग
इत्याशंक्य दृष्टांतप्रदर्शनेन परिहरति यथाततः पावनं आत्तः स्वीकृतो माधुर्यं येन तादृशोऽनादेः के
लनारंगादिफलांतर्वर्तिनं भयी त्वा तत् त्यागानं भजति तत्फलं जहाति तथोदासीनो भवति तद्वत् स
र्वस्वरूपसारांशोऽवशिष्टस्तज्ज्ञाभे सति निःसारं दृश्यं नोपादेयं नापि हेयमिति भावः यतो भयादिसं
॥भावनात् तद्धेयमित्युच्यते॥२८ राम॥

ॐ
राम॰
गी॰टी॰
२५
15

इतरस्मान्नित्यत्वेन तज्जन्यवैराग्यार्थमात्मन एव नित्यत्वमाह कदाचिदिति कदापीत्यर्थः ॥ अनवः
नुतत्वान्नेतरं विद्यमानो हि नवः तेन जन्मानन्तरास्तित्वं आवर्तितं नवत्वाभावेनैव जीर्णत्वा
भावादवस्थान्तरापत्तिरूपपरिणामोपि निरस्तः ॥ अनेन जायतेऽस्ति विपरिणमते वर्धते क्षीय
ते नश्यतीति षड्भावविकाररहितत्वमुक्तं एवं चैतद्भिन्नं सर्वमुक्तषड्भावविकारवत्त्वादनि
त्यमिति ततो विरज्येतेति बोधितं यतर्देहे शोत्यस्य वनिरस्तः सर्वस्य देहेंद्रियादेरतिशयो मह

कदाचिदात्मा न म्रियते न जायते न क्षीयते नापि विवर्धते नवः ॥ निरस्तसर्वा
तिशयः सुखात्मकः स्वयंप्रभः सर्वगतोऽयमद्वयः ॥ २५ ॥ राम ॥

त्वं येन त्वस्ताभावात्तः पश्चाभावान्नापरोऽस्त्यभ इति श्रुतेः यतः सुखात्मकः आनंदस्वरूपः स्वयप्र
भः स्वप्रकाशश्च देहेंद्रियादिस्तु दुःखरूपः परप्रकाश्यश्च तस्य भासा सर्वमिदं विभातीति
श्रुतेः सर्वगतो व्यापकः अयमहं बुद्धिविषयप्रत्यगात्मापि अद्वयः उक्ताद्वयब्रह्मस्वरू
पत्वान्न ततोतिरिक्त इति भावः अयमात्मा ब्रह्मेति श्रुतेः ॥ २५ ॥ राम ॥

नन्वेवंविधे विकारशून्ये आत्मनि जन्ममरणादिप्रवाहरूपसंसारमानं कथमिति शङ्कते ए
वंविधे इति दुःखमयः दुःखप्रचुरः ॥ उत्तरयति अज्ञानत इति अज्ञानमूलकोऽध्यासो देहांतः
करणादौ अहंममेत्यध्यासलक्षणात् एवं च भ्रांतिरूपात् प्रतीतिरिति भावः नन्वेवं कथं त
स्य संसारस्य निवृत्तिरित्यत आह ज्ञाने इति आविर्भूते इति शेषः ज्ञानस्याज्ञानविरोधित्वादुत्प
न्नक्षणे एव कारणभूताज्ञाननाशात्तत्कार्यसंसारस्यापि विलयः इत्यर्थः यथा रज्जुज्ञानेन र
ज्जुसर्पस्य लय इत्यर्थः ॥ २४ ॥ अथाध्यासलक्षणमाह ॥ यदन्यदिति यदन्यत्सर्पादिकमन्य

एवंविधे ज्ञानमये सुखात्मके कथं भवो दुःखमयः प्रतीयते ॥ अज्ञानतोऽध्यासवशा
त्प्रकाशते ज्ञाने विलीयेत विरोधतः क्षणात् ॥ २४ ॥ यदन्यदन्यत्र विभाव्यते भ्रमादध्या
समित्याहुरमुं विपश्चितः असर्पभूतेऽहिविभावनं यथा रज्ज्वादिके तद्वदपीश्वरे जगत्
॥ २५ ॥

त्र रज्ज्वादौ भ्रमात् भ्रमजनकाद्दोषाद्धि भाव्यते विज्ञायते अमुं विपश्चितो विद्वांसोऽध्यासमि
त्याहुः ॥ यथा सर्पभूते रज्ज्वादौ अहिविभावनं सर्पारोपो रज्जुबुद्धिमूलकस्तद्वदीश्वरे
ऽपि जगत् देहादि संसारात्मकं सर्वं विभाव्यते आत्मज्ञानाभावाद्यथार्थतया ज्ञायते ॥ ॥

ॐ
राम०
गौरी०
२५
15

आत्मनि जगज्ज्ञाने कीदृशोऽध्यासे निमि ॥ अंतदाह ॥ विकल्पेति सर्वविकल्पकारणमायारहिते
वस्तुतस्तत्संगरहिते चिदात्मके चित्स्वरूपे सर्वकारणे निरामये दुःखासंभिन्नानंदमये केवले सर्व
विकारशून्ये परे स्वरूपविलक्षणे ब्रह्मणि आपके आत्मनि प्रथमम् अहंकारः कल्पितः स एवाध्या
सः अहंबुध्यात्मकोऽध्यास एव सर्वसंसारकारणमिति भावः ॥ २४ ॥ बुद्धिनिष्ठा एव संसारेण न
त्वात्मनिष्ठ इत्यत्रान्वयव्यतिरेकौ प्रमाणयति ॥ इच्छादीति परे सर्वसाक्षिणि आत्मनि संसृतिहे
तवः भासमानसंसारकारणं सदाकांक्षरूपे यदि इच्छादिरागादिसुखदुःखादिधर्मिकाः इत्यपेत्तेन

विकल्पमायारहिते चिदात्मकेऽहंकार एष प्रथमः प्रकल्पितः ॥ अध्यास एवात्मनि
सर्वकारणे निरामये ब्रह्मणि केवले परे ॥ २४ ॥ इच्छादिरागादिसुखादिधर्मिकाः सदा
धियः संसृतिहेतवः परे यस्मात्प्रसुप्तौ तदभावतः परः सुखस्वरूपेण विभाव्यते
॥ हि नः ॥ २५ ॥

गाढेषो सुखदुःखेच्छामेवमादि इच्छाधर्मिकाः धिय एव धीषु सतीषु संसार इत्यन्वयमुक्त्वा तद्व्य
तिरेकमाह यस्मात्कारणात्प्रसुप्तौ तदभावात् धीरत्नाभावात् आत्मानोऽस्माभिस्तत्तीया
र्थे षष्ठी सुखस्वरूपेण स्वरूपमात्रेण विभाव्यते निश्चीयते न तु संसारित्वेनेति भावः सुप्तोऽस्मि
तः सन्तु सुखमहमस्वाप्समिति प्रत्यभिज्ञानुभवान्नदात्मस्वरूपनिश्चयोऽस्तीति वाक्यार्थः ॥ २५ ॥

पुनस्तत्त्वंपदार्थस्वरूपमाह अनादीति ॥ अनादिर्या विद्या तत्तनुद्भवो यस्या बुद्धेरंतःकरणस्य
तत्रबिंबितः प्रतिबिंबितोपश्रितः प्रकाशः स जीव इतीर्यते आत्मा परमात्मा धियः साक्षितया
धीधर्मासंगेनैव पृथक् स्थितस्तं अंतर्यामितयेत्यर्थः जीवोहं सुखी मादृशप्रकारेणांतःकरण
धर्माध्यासवान् परमात्मा तु साक्षितया सर्वज्ञ विद्यमानोपि न तथेति भावः ॥ अतएव बु

अनाद्यविद्योद्भवबुद्धिबिंबितो जीवः प्रकाशोयमितीर्यते चितः ॥ आ
त्माधियः साक्षितया पृथक् स्थितो बुध्यापरिच्छिन्नपरः स एव हि ॥ ४ ॥ तम ॥

ध्यापरिच्छिन्नपरः बुद्धिलक्षणपरिच्छेदरहितः अतएव परः एवं च ज्ञानेन प्रतिबिंबाधार
विलये प्रतिबिंबस्य विलयात्स जीवः स एव परमात्मैवेति प्रसिद्धे ॥ स इत्यस्य चार्थनिर्देशा
॥ ४० ॥

ॐ
राम०
गी०टी०
२६
16

अथ बुध्यात्मनोः परस्पराध्यासवशात्परस्परधर्मभानमिति दार्ष्टान्तिकमाह चिद्धिंबेति
चिदात्मचेतसोरन्योन्याध्यासवशात्परस्परतादात्म्यारोपाज्जडाजडत्वं प्रतीयते चेतसो बु
द्धीनां ज्ञानत्वं जीवात्मनो जडत्वं प्रतीयते ॥ अत एव ज्ञानाश्रय आत्मेति चित्त एव तार्किक
व्यवहारः जीवात्मनि जडात्मा कथ्यते बुध्येति स्मार्तव्यवहारश्च अध्यासहेतुः चिद्धि

चिद्धिंबसाक्ष्यात्मधियां प्रसंगतस्त्वेकत्र वासादनलाक्तलोहवत्
अन्योन्यमध्यासवशात्प्रतीयते जडाजडत्वं च चिदात्मचेतसोः ॥४९॥

बिंबस्य चिदाभासः अस्यैः सहितः साक्ष्यः सेंद्रियः स चासावात्मा मनः धीरंतःकरणं ते
षां प्रसङ्गः संगात् ॥ अति संनिकर्षादध्यास इत्यर्थः तत्र दृष्टांतः अनलाक्तलोहवत् अग्निना
तप्तलोहपिंडवत् ॥ अग्निधर्मो दाहकत्वं लोहे लोहधर्मश्च वर्तुलत्वाद्यनले भासते तत्र हे
तुरेकत्र वासात् परस्पराविभागेन वृत्तेर्दिलयोस्तद्धेतुयोरपि परस्परधर्माध्यास इ
॥ त्यर्थः ॥४९॥ राम ॥

नुक्रमेवार्थं दर्शयन्नाह गुरोरिति वेदवाक्यतः इत्यनेन श्रवणं गुरोः सकाशादपीत्यनेन
मननं युक्तं ताभ्यां संजातो विद्यया ज्ञानस्वरूपस्यात्मनोनुभवो यस्य सः अनेन कृतनिदिध्यासनस्य
यतेः चिदानंदस्वरूपं स्वात्मानं उपाधिवर्जितं अननुसंहितोपाधिधर्मं आत्मस्थं हृत्स्थं निरीक्ष्य
अपरोक्षीकृत्याशेषं जडं दृश्यं त्यजेत् तत्रोदासीनो भवेदिति भावः ॥४१॥ एवं निरूपाधिकं स्वरू
पं श्लोकद्वयेनाह प्रकाशेति अहं प्रकाशरूपः स्वप्रकाशः परप्रकाशो हि न प्रकाशरूपो यथा घ
टादिः अजो जन्मादिविकाररहीनः अद्वयः सजातीयविजातीयरहितः असकृद्विभातः सकृदपि

गुरोः सकाशादपि वेदवाक्यतः संजातविद्यानुभवो निरीक्ष्य तं ॥ स्वात्मानमात्मस्थमु
पाधिवर्जितं त्यजेदशेषं जडमात्मगोचरं ॥४१॥ प्रकाशरूपोहमजोहमद्वयोसकृद्वि
भातोहमतीवनिर्मलः ॥ विशुद्धविज्ञानघनो निरामयः संपूर्ण आनंदमयोहमक्रि
॥यः ४२॥

परेणाभासकांतरेण प्रकाशितः सकृद्विभातो न सकृत् विभातोऽसकृद्विभातः न तत्र सूर्यो भा
ति न चंद्रतारकमिति श्रुतेः न तद्भासयते सूर्य ॥ इति स्मृतेश्च अतीव निर्मलः मायाकृतावर
णविक्षेपरहितः विशुद्धविज्ञानघनः विशुद्धचिदेकरसः निरामयः कर्तृत्वाभिमानरहि
तः संपूर्णः देशकालवस्तुपरिच्छेदहीनः आनंदमयः आनंदरूपः स्वार्थमपरः अक्रियः प
रिणामहीनः ॥४२॥

ॐ
राम·
गीतै·
८
17

सदैवेतिअहंसदैवकालत्रयेपिमुक्तःसर्वधर्मरहितःअचिंत्यशक्तिमानयःपरमात्माअतींद्रिय
ज्ञानंइंद्रियातिरिक्तज्ञानरूपःयतोवाचोनिवर्तन्तेअप्राप्यमनसासहेतिश्रुतेः॥अविक्रियात्मको
परिणामीअनंतपारःअंतःकालतःपारःपरतीरंतावद्विद्यमानोयस्यतेनदेशकालपरिच्छेद
हीनः॥ईदृशोयःपरमात्मातंअखंडितात्मताविषयानाकृष्टचित्तेनविचारमाणस्यध्यायतः

सदैवमुक्तोहमचिंत्यशक्तिमानतींद्रियज्ञानमविक्रियात्मकः॥अनंतपारोहम
हर्निशंबुधैर्विभावितोहंहृदिवेदवादिभिः॥४४॥एवंसदात्मानमखंडितात्मनावि
चारमाणस्यविशुद्धभावना॥हन्यादविद्यामचिरेणकारकैःरसायनंयद्वदुपासि
॥तंरुजः॥४५॥

धातूनामनेकार्थत्वात्चरमाणएवचारमाणःस्वार्थेणविशुद्धभावनाब्रह्माकारांतःकर
णवृत्तिरुदेतीतिशेषःसाचोदिताकारकैर्देहांतरप्रापककर्मभिःसहाविद्यामचिरेणशीघ्र
मेवहन्यात्यथोपासितंरसायनंरुजोहन्यात्तद्वत्॥४५॥राम॥

तत्र ध्यानैकर्तव्यतामाह विविक्त इति निर्जने इत्यर्थः ॥ आसीनो यथोचितपद्मासनाद्युपवि
ष्टः नृपात्तेंद्रियः निरुद्धव्यापारेंद्रियः तेन शमदमादिसंपन्नः विनिर्जितात्मा प्राणायामा
दिभिर्जितांतःकरण अत एव विमलांतराशयो विशुद्धचित्तः विज्ञानदृक् विज्ञानेनैव दृक्
भानं यस्य सः उपद्रष्टभानरहितः ॥ अनेन निर्विकल्पकसमाधिरुक्तः अनन्यसाधनः त

विविक्त आसीन नृपात्तेंद्रियो विनिर्जितात्मा विमलान्तराशयः ॥
विभावयेदेकमनन्यसाधनो विज्ञानदृक्केवल आत्मसंस्थितः ॥७८॥

त्वज्ञानातिरिक्तमुक्तिसाधनाभिलषितत्वभ्रमरहितः केवलोसंगः आत्मसंस्थितः आत्म
न्येव संस्थासमाप्तिः संजाता यस्य सः तेन न कदापि विषयांतरसंचारवर्जितः विभा
॥ वयेत् ध्यायेत् ॥ ७८ ॥ राम ॥

ॐ
राम॰
गीटी॰
२८

18

किंचविश्वमितिपदेततत्भ्रमविष्णुहृन्मानंविश्वंपरमात्मादर्शनंभासकोपस्यतत्तस्यभा
सासर्वमिदंविभातीतिश्रुतेः तत्सर्वकारणेमायासंनिधानात्सर्वोपादानत्वेनाभिमतेआ
त्मनिविलापयेत्नुपादानसत्ताव्यतिरेकेणकार्यसत्तानपश्येत्तादृशस्यलक्षणमाहसंपू
र्णःअवाप्तसमस्तकामःतस्यकामाभावात्चिदानंदमयःतद्रूपोवतिष्ठेतवाह्यभ्यांतर
वस्तुरूपेणजानातिसर्वंचब्रह्मदर्शनादितिभावः॥४७॥समाधिसिद्धेःपूर्वंयत्कर्तव्यंतदाहपू

विश्वंयदेतत्परमात्मदर्शनंविलापयेदात्मनिसर्वकारणे॥पूर्णश्चिदानंदम
योवतिष्ठतेनवेदवाह्यंनचकिंचिदांतरं॥४७॥पूर्वंसमाधेरखिलंविचिंतयेदों
कारमात्रंसचराचरंजगत्॥तदेववाच्यंप्रणवोहिवाचकोविभाव्यतेऽज्ञानवशान्न
बोधतः॥४८॥ राम॥

र्वमितिसमाधेःसकलविषयव्यासंगनिवृत्तिपूर्वकंब्रह्माकारवृत्तिःसमाधिस्ततःपूर्वमख
िलंसचराचरंजगत्उकारमात्रंविचिंतयेत्अनेनओंकारोमीयतेनयेतिमात्राप्रमाणंबोध
कत्वेवपरिच्छेदकोयस्यतथाजानीयात्तदेवविवृणोति॥तदेवेतिजगदेववाच्यमिम
र्थःप्रणवोवाचकोविभाव्यतेएतत्हिप्रसिद्धमित्यर्थःस्वभावनाज्ञानवशादेवनबोध
तःबोधोनिर्विशेषब्रह्मसाक्षात्कारस्तदुत्पन्नंनेत्यर्थःतस्यसर्ववस्तुपमर्दकत्वात्॥४८॥

नुक्रमर्थं विद्धीत्युक्तमेतदेवाह । अकार इति अकारेति अकारसंज्ञस्तद्वाच्यः पुरुषो हि विश्वकः विश्व एव वि
श्वकः विश्वपादेन परिभावितः अयं च प्रत्यक्साक्षी विराट् ततः स्वप्नसाक्षी तैजसः तेन पदेन प
रिभावितः लिङ्गदेहाभिमानी हिरण्यगर्भ उकारप्रतिपाद्य ईर्यते ततः सुषुप्तिसाक्षी प्राज्ञपद
वाच्यो मायोपाधिको मकारस्तद्वाच्यः परिपठ्यते इति लैर्वैर्दैः इत्य भावनासमाधेः सर्वमेव नत
त्वतः तत्त्वसाक्षात्कारेण इति न भवेत् सर्वस्य ब्रह्मणि प्रविलयात् ॥४९॥ अथ विलापनप्रकार

आकारसंज्ञः पुरुषो हि विश्वको ह्युकारकस्तैजस ईर्यते क्रमात् । प्राज्ञो मकारः
परिपठ्यते विलैः समाधिपूर्वेण तु न तत्त्वतो भवेत् ॥४९॥ विश्वं त्वकारं पुरुषं विला
पयेदुकारमध्ये बहुधा व्यवस्थितं । ततो मकारे प्रविलाप्य तैजसं द्वितीयवर्णं प्र
णवस्य चान्तिमे ॥५०॥ मम ॥

मात्राभ्यां विश्वं त्विति त्वकारमध्ये बहुधा व्यवस्थितं स्थूलदेहनिबंधनस्थूलभोगाभिमा
नेन स्थितं विश्वं पुरुषं तद्वाचकमकारं च विलापयेत् तदर्थे विलीनं भावयेत् ॥ ततस्तै
जसं लिङ्गदेहाभिमानिनं पुरुषं तद्वाचकं प्रणवद्वितीयवर्णमुकारं विलीनं विश्वकं म
कारे विलाप्य विलीनं भावयित्वा ॥५०॥ मम ॥ ॥ ॥

ततस्तादृशंमकारंतद्वाच्यंप्राज्ञंचकारणंकारणत्वाभिमानिनंपुरुषंस्वात्मनिचिद्घनेविला
पयेत् तथाभावयेत् ततःसोहंसर्वविलापाधिष्ठानपरंब्रह्मेतिभावयेत्नहिछिनष्टिसदावि
मुक्तिमतनित्यमुक्तंनत्वहंपदार्थस्यरागद्वेषादिमलिनस्यकथंब्रह्मत्वभावनेत्याशंक्याहंप
दार्थविच्छिन्नष्टिनुपाधितोमुक्तः अतएवामलःतथाभावनेसाधनंविज्ञानहृकविज्ञानंनिदि
ध्यासनंब्रह्ममात्रप्रत्ययाविच्छेदरूपंहृकतत्साक्षात्कारसाधनंयस्यसः॥५१॥एवंभावनाव
तोलक्षणमाहएवमितिनुक्तप्रकारेणसदाजातापरात्मनैकभावनायस्यसःपरिविस्मृतम

मकारमप्यात्मनिचिद्घनेपरेविलापयेत्प्राज्ञमपीहकारणं सोहंपरंब्रह्मस
दाविमुक्तिमद्विज्ञानदृग्मुक्तनुपाधितोमलः॥५१॥एवंसदाजातपरात्मभा
वनःस्वानंदतुष्टःपरिविस्मृताखिलः आस्तेसनित्यात्मसुखप्रकाशकः
॥साक्षाद्विमुक्तोचलवारिसिंधुवत्॥५२॥ रूम॥

विलंघ्यदेहादिर्येनसः अतएवस्वरूपानंदेनैवतुष्टः नतुविषयानंदेनतस्यपरिपूर्णमेवः
स्वरूपत्वान्नतोविरक्तःइत्यर्थः साक्षात् नित्यात्मसुखप्रकाशकःसाक्षात्औपाधिकनामरूप
भेदराहित्येननित्यमखंडितंआत्मस्वरूपंपरमसुखंप्रकाशयन्तद्रूपःएवंरूपोविमुक्तोजीव
न्मुक्तः अचलंनिश्चलंवारियस्यतादृशासिंधुवदास्तेविषयसंबंधरूपलहरीरहितआस्ते
॥इत्यर्थः॥५२॥

ईदृशाः समस्तास्त्रिर्भवन्त्येवेत्याह एवमिति नुक्तप्रकारेण सदाभ्यलसमाधेर्योगिनः निवृत्ताः स
र्वेषामिंद्रियाणांगोचरा विषयाः शब्दादयो यतस्तस्य विनिर्जिता अशेषारिपवः कामादयो ये
न तस्य तज्जयेन विषयेभ्यः अंतःकरणप्रवृत्तिस्सचिता अतएव सर्वतत्त्वनित्यतत्त्वबोधरू

२७

एवं सदाभ्यलसमाधियोगिनो निवृत्तसर्वेंद्रियगोचरस्य हि ॥
विनिर्जिताशेषरिपोरहं सदा दृश्यो भवेयं जितषड्गुणात्मनः ॥५३॥

पत्यस्वतंत्रत्वनित्यमुक्तत्वानंतरूपाः षड्गुणा यस्य तादृशश्चात्मा जितो वशीकृतो
येन तस्य सदा दृश्येण भवेयं एतेन मद्भक्तस्य योगिनोऽहं दृश्येण न तु भक्तिविमुखस्येति सूचितं ॥५४॥

ॐ
राम
गी·टी·
२०

20

एवंविधोजीवन्मुक्तः प्रारब्धवशेनाभिमानहीनः भोगाननुतिष्ठेत् ततोमय्येवविलीय
तेमद्रूपोभवतीत्याह ध्यात्वैवमितिस्पष्टार्थः श्लोकः ॥५४॥ सर्वधर्मापेक्षयायमेवधर्मोज्या
नित्याह आदौचेतिभवंसंसारं आदिमध्यावसानेषुसर्वथाभयशोककपोः कारणं विदित्वात
त्कारणीभूतंविधिवादैर्यज्ञेतेत्यादिभिश्चोदितंबोधितंसमस्तंकर्ममार्गकाण्डंहित्वाप्रवि

ध्यात्वैवमात्मानमहर्निशंमुनिस्तिष्ठेत्सदामुक्तसमस्तबंधनः ॥ प्रारब्धम
श्नन्नभिमानवर्जितोमय्येवसाक्षात्प्रविलीयतेततः ॥५४॥ आदौचमध्येच
तथैवचांततोभवंविदित्वाभयशोककारणं हित्वासमस्तंविधिवादचो
दितंभजेत्स्वमात्मानमथाखिलात्मनां ॥५५॥ राम ॥

त्मनांजीवानांस्वरूपभूतमात्मानंपरमेश्वरंभजेत् ॥ यथाधनस्यार्जनेनाशेदुःखं
मध्येपालनकृतंतत्राशनाशादिकृतंभयंअंतेनाशेपशोकपर्यवसायिदुःखमेवंपदार्थमा
॥ त्रेदृष्टव्यं ॥५५॥ राम ॥

मय्यभेदभावनयानामरूपाविभागेनमद्रूपएवभवतीत्यमुमर्थंसदृष्टांतमाहात्मनीतिआत्मनिसर्वा
धिष्ठानेमयिदृष्टेस्वस्वरूपंजीवमभेदेनविभावयनपदातिष्ठतीतिशेषः तदामयात्मनापरमेश्वरेणाभे
देनभवतिअभिन्नोभवतितत्रदृष्टांतयथासमुद्रेप्रविष्टंनद्यादिजलंसमुद्रएवयथाक्षीरेगवादिक्षीरे

आत्मन्यभेदेनविभावयन्निदंभवत्यभेदेनमयात्मनातदा॥यथा
जलंवारिनिधौयथापयःक्षीरेवियद्व्योम्न्यनिलेयथानिलः॥५६॥

प्रक्षिप्तंपयःक्षीरमेवयथाघोऽग्निमहाकाशेघटाद्यवच्छिन्नाकाशोघटादिभंगेयथाचर्ममस्त्रि
काद्यवच्छिन्नोवायुरनिलेमहावायौनामरूपाविभागेनैक्यंभवतीत्यर्थः॥५७॥

ॐ
राम
गी॰टी
२१

21

एवमात्मतत्वज्ञस्य जगत्सत्यत्वभ्रमः स्यात एवायेतीत्याह इत्थमिति द्वाभ्यां यथेष्टं लोकसंस्थितोपि जीवन्मुक्ति
दशायां प्रारब्धवशाल्लोकव्यवहारं कुर्वन्नपि जगन्मृषैवेति भावयन्सन्नुपरिपराद्दृत्यमीहेत एकांतमपजा
नीयात् तदानिवृत्तं जगत्सत्यत्वभ्रमो भवतीति शेषः ॥ तत्र हेतुः श्रुतियुक्तिमानतो निराकृतत्वात् श्रु
तेन्यदार्तमित्यादि श्रुतिरूपात् जगन्मिथ्या दृश्यत्वात् शुक्तिरजतवदिति तदुपबृंहितानुमानरूप

इत्थं यदीहेत तर्हि लोकसंस्थितो जगन्मृषैवेति विभावयन्मुनिः
निराकृतत्वाच्छ्रुतियुक्तिमानतो यथेंदुभेदो दिशि दिग्भ्रमादयः ॥१८॥

युक्तिरूपात्मानतः प्रमाणतो निराकृतत्वात् तत्र दृष्टांतो यथेंदुभेदः एकत्वे चेंदोर्द्वित्वभ्रमस्तदेक
त्वज्ञानेन निवर्त्तते यथा च दिशि प्राच्यादौ अन्यदिक्त्वभ्रमः सोपि तत्वज्ञानान्निवर्त्तते एवं भ्रमतः
पुरुषस्यादित्यभ्रमणाभ्रमः निकटवर्त्तिवृक्षादौ वा भ्रमणाभ्रमस्तत्स्थैर्यज्ञानेन निवर्त्तते तद्वत्

८

रस्यान्नानेमदाराधनमेवोपायइत्याहयावदिति अखिलंजगन्मदात्मकंमदधिष्ठान
कंमद्विवर्त्तभूतंयावन्नपश्येत्तावत्स्वाप्नोयेश्रद्धालुःभगवदाराधनमेवज्ञानप्रयक
मित्यत्रदृढविश्वासवानतिशयेनोर्ज्जितावद्धिमतीभक्तिर्मयिभगवतिप्रज्ञताबुद्धि
रूपाचिन्हंलक्षणंयस्यसःतावन्मदाराधननिष्ठोभवेत्एवंहितस्यहृदिअहमहर्निशं

यावत्सर्वंनपश्येदखिलंमदात्मकं तावन्मदाराधनतत्परोभवेत् ॥ श्रद्धालु
रत्यूर्जितभक्तिलक्षणोयस्तस्यदृश्योहमहर्निशंहृदि ॥५६॥ एतत्समेतत्कु
तिसारसंग्रहंमयाविनिश्चितंतवोदितंप्रिय यस्त्वेतदालोचयतीहबु
द्धिमान्समुच्यतेपातकराशिभिःक्षणात् ॥५७॥ राम ॥

हरेपापभवांभिर्येषांयामांश्रयन्तेतांस्तथैवभजाम्यहमितिस्मृतेः५८ लोकवचन
ज्ञातस्यस्मृतिसमतंकथयन्नेतदालोचनमपिमदाराधनप्रतिबंधकदुरितध्वंसोपा
यइत्याहएतस्मादितिश्रुतिसारसंग्रहत्वेनातिगोपनीयताअप्रमाणकाकलंकरा
हित्यंचसूचितंआलोचयतिसम्यक्विचारयति ॥५७॥ राम ॥ ॥ राम ॥

ॐ
राम
गी॰टी
२२

22

अथ भगवानुक्तमेवार्थं संक्षेपेण द्वाभ्यामुपदिशन्नाहं भ्रान्तरितियदीतियदि स्वेर्थे यदिदं जग
त्परिदृश्यते तत्सर्वं मायैवेति ज्ञेयं त्वयेति शेषः चेतसा सर्वं परिहृत्य ततो दासीमेकं त्वाम
द्भावनया मदैक्यभावनया भावितशुद्ध्यमानः संपस्यतादृश्यालिष्टः स्वपदिश्यपादिशेषः प्रा
हनिरामयः सन्मुखीभव सर्वदुःखनिवृत्त्येति भावः ततोंतरंगमन्यमाह आनंदमयोभ
वतद्रूपोभवेत्यर्थः यद्यपि हृद्वेमाने रूपत्वमस्येव तथापि तत्प्राप्तिःविस्मृतकंरस्य
भ्रष्टप्राप्तिवत् ॥ २० ॥ एवं रीत्या ह्युपासकस्य लोकपावनत्वमाह यः इति कदावायदाक
दाविदित्यर्थः हृदा निर्मलेनोततः करणेन यो मामगुणं प्राकृतसत्वरजस्तमोरूपगुण

भ्रांतर्यदीदं परिदृश्यते जगन्मयैव सर्वं परिहृत्य चेतसा ॥ मद्भावनाभावि
तशुद्धमानसः सुखी भवानंदमयो निरामयः ॥ २० ॥ यः सेवते मामगुणं गुण
त्परं हृदा कदा वा यदि वा गुणात्मकं सोहं स्वपादांचितरेणुभिः स्पृशन्पुनाति लो
कत्रयं यथा रविः ॥ २१ ॥ नम ॥

रहितं सच्चिदानंदरूपत्वात् अत एव गुणात्परं गुणाद्व्याकृतात्परं मायातीतं यदिवा
यदि स्वेर्थे गुणात्मकं सर्वज्ञत्वादिसौंदर्यलावण्यादिगुणवानात्मा मूर्तिर्यस्य तं स्वरूपमा
नरूपं सेवते स हि विधोपासकः अहं मत्स्वरूप एव मामकरत्वयैव श्रियो हि तानि नो
सर्थं महं स च मम प्रियः स्तुकैः तादृशो भक्तः स्वपादतलग्नरेणुभिः स्पृशन्लोकत्रयम
पि पुनाति अज्ञानध्वांतनिरसनेन पवित्रीकरोति यथा रविः स्वकरैर्जगद्धितिमिरीकरो
॥ तितद्वत् ॥ २१ ॥

इदानीमेतद्ग्रंथार्थालोचनासमर्थस्य पाठमात्रतोपि महत्फलमाह विज्ञानमिति विज्ञानजनकं कारण मुत्तमेति वा अध्यवेदांतैरुपनिषद्वाक्यैर्वेद्यं चरणं जगज्जन्मादिलक्षणं कर्म यस्य तेन मया गीतं तदनुपठनमात्रादेतादृशमहत्फलप्राप्तिः कथमित्याशंक्य भवत्येवेति सूचयन् तत्र हेतुमाह मद्वचनेषु भक्तिर्विश्वासो यदीत्यर्थः गुरुवाक्यविश्वासस्यैव फलदायकत्वादिति भावः ।६२।

विज्ञानमेतदखिलं श्रुतिसारमेकं वेदांतवेद्यचरणेन मयैव गीतं यः श्रद्धया परिपठेद्गुरुभक्तियुक्तो मद्रूपमेति यदि मद्वचनेषु भक्तिः ॥६२॥ इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे उत्तरकांडे श्रीरामगीता नाम ॥ पंचमः सर्गः ॥५॥

इति श्रीमत्सकलराजविपदुद्धरणसमर्थत्वादिविरुदावलीविराजमानसत्सिम्मातिवर्मणः पुत्रस्य श्रीरामवर्मणः कृतावध्यात्मरामायणसेतौ उत्तरकांडे श्रीरामगीताटीका संवत् ।१८६८॥ मिती माघशुदी ॥ ५ ॥ दिने १४ ॥ वार शनिश्चर ॥ पंचमः सर्गः ५ ॥
॥ लिषतं मिश्र गंगाराम मोक्षास्वपठनार्थं ॥ शुभं भूयात् ॥